अमसः, पुं, (अम गतिरोगादौ असच् ।) कालः । निर्बोधः । रोगः । इत्युणादिकोषः ॥ ("अमसो वालिशे काले रोगभेदे पुमानयं" । इति अमरः ।)

अमा, व्य,, (न मा + का स्वरादित्वादव्ययं ।) सहार्थं । निकटं । इत्यमरः ॥

अमा, स्त्री, (न माति सूर्य्योदयविशेषं परिच्छिनत्ति, मा + क, नञ्समासः ।) अमावस्या । इति त्रिकाण्डशेषः ॥ चन्द्रमण्डलस्य षोड़शकला । तथा च स्कान्दपुराणीयप्रभासखण्डे ।
"अमा षोड़शभागेन देवि प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी" ॥
अस्यार्थः । चन्द्रमण्डलस्य षोड़शभागेन परिमिता आधारशक्तिरूपा क्षयोदयरहितत्वात् नित्या स्रक्सूत्रवत् सर्व्वानुस्यूता अमा नाम्नी महाकला प्रोक्ता । इति रघुनन्दनः ॥ (सह । सार्द्धं । समीपं । निकटं । अन्तिकं ।)

अमांसः, त्रि, (नास्ति मांसं यस्य सः ।) दुर्ब्बलः । इत्यमरः ॥ अल्पमांसयुक्तः । मांसरहितश्च ॥ (कृशः । क्षीणकायः । निरामिषभक्ष्यवस्तु ।)

अमात्यः, पुं, (अमा सह विद्यते, अमा + त्यप् ।) मन्त्री । इत्यमरः ॥ तत्परीक्षा । यथा,—
"शान्तो विनीतः कुशलः सत्कुलीनः शुभान्वितः ।
शास्त्रार्थतत्त्वगोऽमात्यो भवेद्भूमिभुजामिह" ॥ इति युक्तिकल्पतरुः ॥
("भृता हि पाण्डुनामात्या बलञ्च सततं भृतं ।
मान्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान्" ॥
इति महाभारते ।)

अमाननं, क्ली, (मन् + णिच् + भावे ल्युट्, नञ्समासः ।) अनादरः । न्यक्कारः । इति शब्दरत्नावली ॥
("अतुच्छिदानं कृतपूर्व्वनाशन-
ममाननं दुश्चरितानुकीर्त्तनं ।
कथाप्रसङ्गेन च नामविस्मृति-
र्विरक्तभावस्य जनस्य लक्षणं" ॥
इति हितोपदेशे ।)

अमानस्यं, क्ली, (मानसाय मनसे हितं मानस + यत्, नञ्समासः ।) दुःखं । पीड़ा । व्यथा । तद्युक्ते त्रि । इत्यमरः ॥ आमनस्यं आमानस्यमपि पाठः ॥

अमान्यः, त्रि, (मन् + कर्म्मणि ण्यत्, नञ्समासः ।) अमाननीयः । अनादृतः । मान्यशब्दस्य नञा समासः ॥

अमामसी, स्त्री, (अमा सह सूर्य्येण मासो यस्यां, गौरादित्वात् ङीष् । पृषोदरादित्वात् ह्रस्वः ।) अमावस्या । इत्यमरटीकायां रमानाथः ॥

अमामासी, स्त्री, (अमा सह सूर्य्येण मासो यस्यां, गौरादित्वात् ङीष् ।) अमावस्या । इत्यमरटीकायां रमानाथः ॥

अमायिकः, त्रि, (न + माया + ठन्, तस्य इक ।) मायारहितः । माया विद्यते यस्य स मायिकः ततो नञा समासः ॥

अमावसी, स्त्री, (अमा सहितेन वसतश्चन्द्रार्कौ यस्यां, अमा + वस + अधिकरणे गौरादित्वात् ङीष् ।) अमावास्या । इति शब्दरत्नावली ॥

अमावस्या, स्त्री, (अमा सहितेन वसतश्चन्द्रार्कौ यस्यां, अमा + वस + आधारे ण्यत् स्त्रियां टाप् ।) कृष्णपक्षान्ततिथिः । सा तु चन्द्रमण्डलस्य पञ्चदशकलाक्रियाख्या तत्क्रियोपलक्षितः कालो वा । इति तिथ्यादितत्त्वं ॥ सूर्य्याचन्द्रमसोर्यः परः सन्निकर्षः सामावस्या । इति गोभिलः ॥ परः सन्निकर्षश्च उपर्य्यधोभावापन्नसमसूत्रपातन्यायेन एकराश्यवच्छेदेन सहावस्थानरूपः । इति रघुनन्दनः ॥ तत्पर्य्यायः । अमावास्या २ । दर्शः ३ । सूर्य्येन्दुसङ्गमः ४ । इत्यमरः ॥ पञ्चदशी ५ । इति स्मृतिः ॥ अमावसी ६ । अमावासी ७ । इति शब्दरत्नावली ॥ अमामसी ८ । अमामासी ९ । इत्यमरटीकायां रमानाथः ॥ सा दृष्टेन्दुकला सिनीवाली १० । नष्टेन्दुकला च कुहूः ११ । इत्यमरः ॥ तद्व्यवस्थादि यथा । अथामावस्या । सा च प्रतिपद्युता ग्राह्या युग्मात् । वराहपुराणे चाण्डालशपथे ।
"षष्ठ्यष्टम्यप्यमावास्या उभे पक्षे चतुर्द्दशी ।
अस्नातानां गतिं यास्ये यद्यहं नागमे पुनः" ॥
अतोऽत्र स्नानमावश्यकं । अतोऽत्र जीवत्पितृकेणापि स्नातव्यम् ।
"अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनं ।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्" ॥
इति वचनं रागप्राप्तस्नाननिषेधकं ।
"भोगाय क्रियते यत्तु स्नानं याहच्छिकं नरैः ।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु" ॥
इति पयोदशीप्रकरणोक्तवचनाच्च ॥ * ॥ पैठिनसिः । "न पर्व्वसु तैलं क्षौरं मांसमभ्युपेयात् नामावास्यायां हरितमपि छिन्द्यात्" । इति ॥ * ॥
"पुष्ये तु जन्मनक्षत्रे व्यतीपाते च वैधृतौ ।
अमायाञ्च नदीस्नानं पुनात्यासप्तमं कुलं" ॥
अत्र दहत्याजन्मदुष्कृतमिति ज्योतिषे पाठः ॥*॥ व्यासः ।
"अमावास्यां भवेद्वारो यदि भूमिसुतस्य च ।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी" ॥
"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम्" ॥
सिनीवाली चतुर्द्दशीयुक्तामावास्या यद्यपि प्रशस्ता एवमन्यत्रापि वारविशिष्टविधौ न युग्मादरः निरवकाशत्वेन संशयायोगात् । एतच्च मौनमरुणोदयकालमारभ्य स्नानपर्य्यन्तं । न तु स्नानकालमात्रे ।
तत्र,
"उच्चारे मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत्" ॥
इति स्कान्देन तस्य सामान्यतः प्राप्तत्वात् । उच्चारे पुरीषोत्सर्गे ॥ * ॥ स्मृतिः ।
"करतोयाजलं प्राप्य यदि सोमयुता कुहूः ।
अरुणोदयवेलायां सूर्य्यग्रहशतैः समा" ॥
स्नानमन्त्रः ।
"करतोये सदानीरे सरिच्छ्रेष्ठे सुविश्रुते ।
पौण्ड्रान् प्लावयसे नित्यं पापं हर करोद्भवे" ॥
पौण्ड्रान् देशविशेषान् ॥ * ॥ मरीचिः ।
"मासे नभस्यमावास्या तस्यां दर्भचयो मतः ।
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः" ॥
अत्र ।
"दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः ।
अयातयामान्येतानि नियोज्यानि पुनः पुनः" ॥
इति गृह्यपरिशिष्टवचनेनैव सिद्धौ श्रावणामावास्याया उपादानं ।
"वार्षिकांश्चतुरो मासान्नाहरेत् कुशमृत्तिकाः ।
आददीत नभावेऽपि सद्यो यस्योपयोजनं" ॥
इति संवत्सरप्रदीपधृतशिवरहस्यीयस्यापवादकमिति ॥ विद्याकरधृतं ।
"सङ्ग्रहाद्वत्सरं यावत् शुद्धिः स्यादग्निवर्हिषां ।
ततः परं न गृह्णीयात् अमादौ यज्ञकर्म्मणि" ॥*॥
संवत्सरप्रदीपे ।
"अमावास्यान्तु कन्यार्के तीर्थप्राप्तौ तथा मृत ।
कृत्वा श्राद्धं विधानेन दद्यात् षोड़शपिण्डकं" ॥
तत्प्रमाणप्रयोगौ षोड़शीशब्दे द्रष्टव्यौ ॥ * ॥
अमावास्यायामपि मलमासे श्राद्धाभावमाह कौथुमिः ।
"संवत्सरातिरेको वै मासो यः स्यात्त्रयोदशः ।
तस्मिंस्त्रयोदशे श्राद्धं न कुर्य्यादिन्दुसंक्षये" ॥
सम्वत्सरप्रदीपे ।
"एकराशिस्थिते सूर्य्ये यदि दर्शद्वयं भवेत् ।
दर्शश्राद्धं तदादौ स्यान्न परत्र मलिम्लुचे" ॥
यत्तु ।
"जातकर्म्मणि यत् श्राद्धं दर्शश्राद्धं तथैव च ।
मलमासेऽपि तत्कार्य्यं व्यासस्य वचनं यथा" ॥
इति व्यासवचनं तत्पिण्डपितृयज्ञाख्यश्राद्धपरं ॥*॥
अमावास्याश्राद्धकालमाह छन्दोगपरिशिष्टं ।
"पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयांशे नातिसन्ध्यासमीपतः" ॥
पिण्डानां पितृणां अन्वाहार्य्यं श्राद्धं मासैकतृप्तिजनकं यत्तत्तथा । तथा च मनुः ।
"पिण्डानां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः" ।
राजनि चन्द्रे । शस्यत इत्यनेन क्वचिच्चन्द्रक्षयाभावेऽपि अमावास्याश्राद्धं सूचितं । एतादृग्व्युत्पत्तेः साग्निनिरग्निसाधारणत्वात् वक्ष्यमाणकात्यायनोक्तरीत्या क्षीणारम्भितावर्द्धमानभेदः साधारणः ॥ * ॥ यत्तु,—
"पितृयज्ञन्तु निर्व्वर्त्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकं" ॥
इति मनुवचनं तत्साग्निः पिण्डपितृयज्ञं निर्व्वर्त्त्य मासानुमासिकं प्रतिमासिकं श्राद्धं कुर्व्वीतेतिक्रमविधायकं । अत्रानुशब्दस्य वीप्सार्थकत्वं । तथा च ।
"लक्षणेत्थम्भूताख्यानभागे परिप्रती ।
अनुरेषु सहार्थे च हीने उपश्च कथ्यते" ॥
चन्द्रक्षयेऽमावास्यायां न तु कात्यायनोक्तक्षये